



काव्यकथा -

मणिमञ्जीरम्-१


द्विसहस्रवर्षेभ्यः पूर्वं कावेरी-समुद्रयोः सङ्गमस्थले पूम्पुहार्नामकं नगरम् आसीत्। एतत् चोलराजानां राजधानी आसीत्। अत्र अनेके देवालयाः उत्तमभवनानि च आसन्।

चोलराजानः धर्मेण राज्यं परिपालयन्ति स्म। ते कलापोषकाः अपि आसन्। तेषां शासने जनाः सुखेन निवसन्ति स्म। न केवलं भारतदेशस्थानां राज्येभ्यः, ग्रीस्-रोम्प्रभृतिभ्यः देशेभ्यः अपि राजदूताः पण्डिताः च चोलराजानां दर्शनार्थम् आगच्छन्ति स्म।





सुदूरात् प्रान्तात् नौकाः पूम्पुहारनौकास्थानम् आगच्छन्ति स्म । एतन्नगरीयाः नागरिकाः सुसम्पन्नाः प्रामाणिकाः च आसन् । अतः अत्र वाणिज्यं कर्तुं सर्वे वणिजः उत्साहिनः भवन्ति स्म ।



पुम्पुहारुनगरस्य वीथीषु वाणिज्यार्थं स्थापितानां रत्न-माणिक्यादीनां राशिः एव दृश्यते स्म। तत् नगरम् इन्द्रनगरी इव ऐश्वर्योपेतम् आसीत्।

एतस्मिन् नगरे मणीकानुनामकः वणिक् निवसति स्म। समुद्रवाणिज्यं तस्य वृत्तिः। तस्य पुत्री कण्णगी। सा सद्गुणसम्पन्ना। सा सौन्दर्येण लक्ष्मीः इव अस्ति इति सर्वत्र प्रसिद्धिः आसीत्।






मणीकानुगृहस्य समीपे एव मासात्तुवानुनामकः आढ्यः वणिक् निवसति स्म। तस्य पुत्रस्य नाम कोवलन् इति। सः अपि मन्मथः इव सुन्दरः, सद्गुणसम्पन्नः च। निर्धनेभ्यः धन दाने तस्य विशेषरतिः।

मणैकान् मासात्त्वान् च आत्मीयौ स्नेहितौ। यदि कोवलन्-कण्णग्योः विवाहः भवेत् तर्हि सम्बन्धः दृढतरः भवेत् इति नौ निश्चितवन्तौ। तयोः एतं निश्चयं सर्वे बहुधा श्लाघितवन्तः।





ज्येष्ठानां सम्मुखे विवाहमुहूर्तः निश्चितः। मङ्गलवाद्यघोषेण सह शोभायात्रया वधूवरौ कल्याणमण्डपं प्रति आनीतौ।

पुरोहितेषु वेदमन्त्रान् उच्चारयत्सु कण्णगी कोवलन् च अग्निं प्रदक्षिणीकृतवन्तौ। विवाहार्थम् आगताः सुमङ्गल्यः गीतं गायन्त्यः पुष्पाणि सुगन्धद्रव्याणि च अवकिरन्त्यः आशिषा अनुगृहीतवत्यः।





गृहम् आगताः अतिथयः विशेषतः सत्करणीयाः, गृहस्थधर्मश्च विना लोपं पालनीयः इति उद्देशेन कोवलनस्य माता वधूवरयोः वसतिनिमित्तं नूतनं भवनम् उपकल्पितवती। कण्णगी-कोवलन् च सुखेन सन्तोषेण च जीवितवन्तौ।

तस्मिन् एव नगरे सौन्दर्यस्य खनी माधवी नाम नटी आसीत्। सा योग्यस्य गुरोः सकाशात् श्रद्धया भक्त्या च नाट्यकलाम् अधीतवती आसीत्।





नाट्याभ्यासस्य समाप्तेः अनन्तरम् एकस्मिन् दिने माधवी पुरप्रमुखान् स्वगृहम् आहूय तेषां सम्मुखे स्वकीयां नाट्यकलाप्रौढतां प्रदर्शितवती।

—(अनुवर्तते)


काव्यकथा -

मणिमञ्जीरम्-२

पूम्पुहार्नगरस्य युवकः वणिक् कोवलन् समुद्रवणिजः पुत्रीं कण्णगीं परिणीतवान्। माधवी नाम युवतिः स्वनृत्याभ्यासं समापितवती। राज्ञः, नगरस्य प्रमुखाणां च सम्मुखे सा स्वनृत्यविद्यायाः प्रथमप्रदर्शनं कृतवती।



स्वनृत्यकलया माधवी प्रेक्षकान् मन्त्रमुग्धान् कृतवती। कार्यक्रमस्य अन्ते सर्वे उत्साहेन करताडनं कृतवन्तः। माधव्याः नृत्यकलाकौशलं बहुधा प्रशंसितवन्तः अपि।





नृत्येन सन्तुष्टः राजा माधव्यै मरकतमणिखचितां मालां सहस्रं सुवर्णनाणकानि च पुरस्काररूपेण दत्तवान्। एतेन माधव्या प्राप्तस्य सन्तोषस्य सीमा एव न आसीत्।



तत्कालीनसम्प्रदायानुगुणं कलाकारिण्या तया राज्ञा पुरस्काररूपेण दत्तः सः हारः धनिकाय कस्मैचित् विक्रेतव्यः आसीत्। माधवी हारं स्वसख्याः हस्ते अर्पयन्ती उक्तवती— "सन्ध्यासमये धनिकसञ्चारयोग्ये मार्गे एतस्य हारस्य विक्रयणं करोतु" इति।

यः तं हारम् एकसहस्रेण सुवर्णनाणकैः क्रीणाति तस्य प्रीतिपात्रं भवति माधवी। तादृशस्य पुरुषस्य निमित्तं केवलं सा नर्तिष्यति गास्यति च। एषः तत्कालीनः सम्प्रदायः आसीत्। कोवलन् तु माधव्याः नृत्येन बहुधा आकृष्टः आसीत्। अतः सः माधव्याः सखीतः तं हारं क्रीतवान।





माधव्याः सख्या सह कोवलन् माधव्याः कलामन्दिरं प्रविष्टवान्। माधवी महता आदरेण प्रेम्णा च तस्य सत्कारं कृतवती। अपूर्वैः नृत्यसङ्गीतादिभिः सा कोवलनं सन्तोषितवती। माधव्याः सौन्दर्यातिशयं नृत्यकुशलतां च दृष्ट्वा कोवलन् नितरां व्यामुग्धः।

एवं नृत्यसङ्गीतास्वादनार्थं कोवलन् माधव्याः सम्पर्के आगतः, सत्यम्, किन्तु क्रमशः सः तस्याः प्रेमजाले पतितः। माधवी तं पतिम् इव भावितवती। उभौ अपि सकलं विस्मृत्य प्रेमव्यवहारे नितरां निमग्नौ। कोवलनस्य अधिकः समयः माधव्याः गृहे एव यापितः भवति स्म।






एवं प्रेमपाशेन बद्धौ तौ कदाचित् नगरभ्रमणार्थं निर्गच्छतः। नगरस्य विशेषदृश्यानि पश्यन्तौ तौ मायास्तम्भसमीपं गतवन्तौ। तस्य स्तम्भस्य परिक्रमणं यः करोति सः सर्पविषतः मनोव्याकुलत्वतः पिशाचपीडातः च निर्मुक्तः भवति। तौ तस्य स्तम्भस्य परिक्रमणं कृतवन्तौ।


तत्रत्ये उद्याने काचित् विशिष्टा मूर्तिः आसीत्। यदि राजा जानन् अजानन् वा अधर्माचरणं कुर्यात् तर्हि मूर्तेः नेत्राभ्याम् अश्रूणि आगच्छन्ति। अतः राजा सदा धर्ममार्गेण गच्छति। राजानम् अनुसृत्य प्रजाः अपि धर्ममार्गम् अनुसरन्ति। तेन देशे सर्वत्र सुखशान्त्यादयः व्याप्ताः आसन्।





नगरस्य मध्यभागे किञ्चन अपूर्वं सरोवरम् आसीत्। जनानां विश्वास आसीत् यत् तस्मिन् सरोवरे यः स्नानं करोति तस्य सर्वे रोगाः अपगताः भवन्ति इति। तत्र स्नानेन मूकाः वक्तुं शक्नुवन्ति, बधिराः च शृण्वन्ति। एतादृशानि अपूर्वाणि स्थलानि पश्यन्तौ कोवलन् माधवी च सन्तोषेण समयं यापयतः। एतादृशानां विहाराणां भोजनकूटानां च निमित्तं कोवलन् समग्रं सम्पत्तिं व्ययीकृतवान्।

सन्ध्यासमये ग्रीस्प्रभृतिभ्यः देशेभ्यः आगतानां नौकानां दीपाः रत्नानि इव प्रकाशन्ते। स्थानीयानां नौकानां दीपाः तां शोभां वर्धयन्ति। प्रासादस्य चन्द्रशालायां स्थित्वा शीतलवायोः स्पर्शसुखम् अनुभवन्तौ कोवलन् माधवी च एतत् अपूर्वं दृश्यं पश्यतः। सन्ध्यां गहनरात्रिरूपेण परिवृत्ताम् अपि तौ न जानीतः।





कोवलन् माधवी च एवं सुखेन दिनानि यापयतः। अपरत्र मन्दभाग्या कण्णगी गृहे उपविश्य मौनम् असहनीयां व्यथाम् अनुभवति। एवं स्थिते अपि सा पत्युः दुर्व्यवहारविषये कमपि किमपि न उक्तवती। आभरणानि एकैकशः विक्रीय गार्हस्थ्यजीवनस्य व्ययं निर्वहति सा। क्रमशः सर्वाणि आभरणानि समाप्तानि अभवन्

—(अनुवर्तते)



काव्यकथा -

मणिमञ्जीरम्-४

पूम्पुहार्नगरस्य वणिक् आसीत् कोवलन्। सः कण्णगीं परित्यज्य नर्तक्याः माधव्याः साहचर्ये कञ्चन कालं यापितवान्। ततः विवेकं प्राप्य पत्नीसमीपम् आगतवान्। अनन्तरं कण्णगी कोवलन् च जीवनमार्गम् अन्विष्यन्तौ मधुरैनगरम् आगतवन्तौ।

तत्र कोवलन् पत्न्या दत्तं मञ्जीरं विक्रीय प्राप्तेन धनेन वाणिज्यम् आरब्धुम् इष्टवान्। मञ्जीरं नीत्वा राजास्थानीयाय स्वर्णकाराय प्रदर्शितवान्। कोवलनस्य हस्ते स्थितं तत् अमूल्यं मञ्जीरं दृष्ट्वा सः स्वर्णकारः आश्चर्यचकितः। तत्र कारणम् अपि आसीत् एव।





तेषु एव दिनेषु राज्ञयाः मञ्जीरं चोरितम् आसीत्। स्वर्णकारः एव चोरितवान् स्यात् इति बहूनाम् अभिप्रायः आसीत्। कोवलनस्य हस्ते स्थितं तत् अमूल्यं मञ्जीरं दृष्ट्वा सः स्वर्णकारः, कोवलनं तत्रैव किञ्चित्कालं स्थातुं सूचयित्वा राज्ञः समीपं गतवान्। 'अहं चोरं प्रदर्शयामि ति उक्तवान् च।



राजा स्वर्णकारस्य वचने विश्वसितवान्। सः पूर्वापरम् अनालोच्य भटान् आहूय 'मञ्जीरचोरं बध्द्वा शूलम् आरोपयन्तु' इति आदिष्टवान्।

भटाः स्वर्णकारेण सह गत्वा कोवलनं बन्धने स्थापितवन्तः। तस्य हस्ते अमूल्यं मञ्जीरं तु आसीत् एव। अतः ते कोवलनं नीत्वा राजाज्ञानुसारं शूलम् आरोपितवन्तः।





धनेन सह आगमिष्यमाणस्य पत्युः प्रतीक्षायाम् आसीत् कण्णगी। सा पत्युः मरणवार्तां प्राप्य दिग्भ्रान्ता। "किं देवः नास्ति प्रपञ्चे? किं न्यायः मृतः वा अस्मिन् नगरे?" इति वदन्ती रुदती आक्रोशन्ती च कण्णगी कोपावेशेन नगरमार्गम आगतवती।

तस्याः कोपावेशम् आक्रोशनं च दृष्ट्वा तत्र बहवः जनाः सम्मिलिताः। तस्याः तादृशेन व्यवहारेण तैः ज्ञातं यत् एतस्याः पत्युः विषये महाराजेन अविवेकेन व्यवहृतम् इति। एतत् ज्ञात्वा ते अपि दिग्भ्रान्ताः।





कण्णगी राजसभां प्रविश्य स्वसमीपे स्थितम् अपरं मञ्जीरं राज्ञे प्रदर्श्य– "निरपराधिनं मम पतिम् अविचार्य शूलम् आरोपितवान् खलु भवान्? पश्यतु, मम मञ्जीरे माणिक्यानि सन्ति" इति उक्त्वा रुदती एव मञ्जीरं भूमौ बलात् पातितवती। तदा मञ्जीरं भग्नं, माणिक्यानि तत्र विकीर्णानि। राज्ञ्याः मञ्जीरे तु मुक्ताः भवन्ति। एतत् दृश्यं दृष्टवतः महाराजस्य हृदयस्तम्भनं जातम्। सः दिवङ्गतः।

राज्ञः मरणं दृष्ट्वा राज्ञी अपि मूर्च्छिता जाता। निरपराधी दण्डितः इति परितापेन राजा मृतः चेत् पतिवियोगात् मूर्च्छितायाः राज्ञ्याः प्राणाः अपि निर्गताः।





एतावता अपि कण्णग्याः कोपः न शान्तः। आवेशवशात् सा रुदती एव त्रिवारं नगरप्रदक्षिणं कृतवती। अधर्माचरणं कुर्वतः राज्ञः नगरं दुष्टानां निलयः इति सा भावितवती। अतः 'एतत् नगरं भस्मसाद्भवतु' इति शापं दत्तवती सा।

नगरे सर्वत्र अकस्मात् अग्निः उद्गतः। 'सज्जनान्, स्त्रियः, वृद्धान्, बालान्, विकलाङ्गान् च रक्षतु' इति अग्निं प्रार्थितवती कण्णगी। अतः तादृशाः अग्नितः रक्षिताः जाताः।





दिव्यरथम् आरुह्य स्वर्गारोहणं कुर्वन्तौ कण्णगीकोवलनौ कैश्चित् भाग्यशालिभिः दृष्टौ इति श्रूयते। कण्णगीं पतिव्रता इति, देवता इति च जनाः पूजयन्ति। संयमस्य पातिव्रत्यस्य च प्रतीकरूपेण सा लोके विराजमाना अस्ति।

—(समाप्तम्)



काव्यकथा -

मणिमञ्जीरम्-४

पूम्पुहार्नगरस्य वणिक् आसीत् कोवलन्। सः कण्णगीं परित्यज्य नर्तक्याः माधव्याः साहचर्ये कञ्चन कालं यापितवान्। ततः विवेकं प्राप्य पत्नीसमीपम् आगतवान्। अनन्तरं कण्णगी कोवलन् च जीवनमार्गम् अन्विष्यन्तौ मधुरैनगरम् आगतवन्तौ।

तत्र कोवलन् पत्न्या दत्तं मञ्जीरं विक्रीय प्राप्तेन धनेन वाणिज्यम् आरब्धुम् इष्टवान्। मञ्जीरं नीत्वा राजास्थानीयाय स्वर्णकाराय प्रदर्शितवान्। कोवलनस्य हस्ते स्थितं तत् अमूल्यं मञ्जीरं दृष्ट्वा सः स्वर्णकारः आश्चर्यचकितः। तत्र कारणम् अपि आसीत् एव।





तेषु एव दिनेषु राज्ञयाः मञ्जीरं चोरितम् आसीत्। स्वर्णकारः एव चोरितवान् स्यात् इति बहूनाम् अभिप्रायः आसीत्। कोवलनस्य हस्ते स्थितं तत् अमूल्यं मञ्जीरं दृष्ट्वा सः स्वर्णकारः, कोवलनं तत्रैव किञ्चित्कालं स्थातुं सूचयित्वा राज्ञः समीपं गतवान्। 'अहं चोरं प्रदर्शयामि ति उक्तवान् च।



राजा स्वर्णकारस्य वचने विश्वसितवान्। सः पूर्वापरम् अनालोच्य भटान् आहूय 'मञ्जीरचोरं बध्द्वा शूलम् आरोपयन्तु' इति आदिष्टवान्।

भटाः स्वर्णकारेण सह गत्वा कोवलनं बन्धने स्थापितवन्तः। तस्य हस्ते अमूल्यं मञ्जीरं तु आसीत् एव। अतः ते कोवलनं नीत्वा राजाज्ञानुसारं शूलम् आरोपितवन्तः।





धनेन सह आगमिष्यमाणस्य पत्युः प्रतीक्षायाम् आसीत् कण्णगी। सा पत्युः मरणवार्तां प्राप्य दिग्भ्रान्ता। "किं देवः नास्ति प्रपञ्चे? किं न्यायः मृतः वा अस्मिन् नगरे?" इति वदन्ती रुदती आक्रोशन्ती च कण्णगी कोपावेशेन नगरमार्गम आगतवती।

तस्याः कोपावेशम् आक्रोशनं च दृष्ट्वा तत्र बहवः जनाः सम्मिलिताः। तस्याः तादृशेन व्यवहारेण तैः ज्ञातं यत् एतस्याः पत्युः विषये महाराजेन अविवेकेन व्यवहृतम् इति। एतत् ज्ञात्वा ते अपि दिग्भ्रान्ताः।





कण्णगी राजसभां प्रविश्य स्वसमीपे स्थितम् अपरं मञ्जीरं राज्ञे प्रदर्श्य– "निरपराधिनं मम पतिम् अविचार्य शूलम् आरोपितवान् खलु भवान्? पश्यतु, मम मञ्जीरे माणिक्यानि सन्ति" इति उक्त्वा रुदती एव मञ्जीरं भूमौ बलात् पातितवती। तदा मञ्जीरं भग्नं, माणिक्यानि तत्र विकीर्णानि। राज्ञ्याः मञ्जीरे तु मुक्ताः भवन्ति। एतत् दृश्यं दृष्टवतः महाराजस्य हृदयस्तम्भनं जातम्। सः दिवङ्गतः।

राज्ञः मरणं दृष्ट्वा राज्ञी अपि मूर्च्छिता जाता। निरपराधी दण्डितः इति परितापेन राजा मृतः चेत् पतिवियोगात् मूर्च्छितायाः राज्ञ्याः प्राणाः अपि निर्गताः।





एतावता अपि कण्णग्याः कोपः न शान्तः। आवेशवशात् सा रुदती एव त्रिवारं नगरप्रदक्षिणं कृतवती। अधर्माचरणं कुर्वतः राज्ञः नगरं दुष्टानां निलयः इति सा भावितवती। अतः 'एतत् नगरं भस्मसाद्भवतु' इति शापं दत्तवती सा।


नगरे सर्वत्र अकस्मात् अग्निः उद्गतः। 'सज्जनान्, स्त्रियः, वृद्धान्, बालान्, विकलाङ्गान् च रक्षतु' इति अग्निं प्रार्थितवती कण्णगी। अतः तादृशाः अग्नितः रक्षिताः जाताः।






दिव्यरथम् आरुह्य स्वर्गारोहणं कुर्वन्तौ कण्णगीकोवलनौ कैश्चित् भाग्यशालिभिः दृष्टौ इति श्रूयते। कण्णगीं पतिव्रता इति, देवता इति च जनाः पूजयन्ति। संयमस्य पातिव्रत्यस्य च प्रतीकरूपेण सा लोके विराजमाना अस्ति।

—(समाप्तम्)



मोतीलालः न्यायशास्त्रं पठित्वा न्यायवादी सञ्जातः। तेषु एव दिनेषु अलहाबादनगरे उच्चन्यायालयः स्थापितः। तत्र एषः न्यायवादिवृत्तिम् आरब्धवान्। अल्पे एव काले धनं सम्पाद्य धनिकः जातः। अग्रजस्य मरणानन्तरं स्वस्य अग्रजस्य च कुटुम्बं समर्थतया पोषितवान् मोतीलालः।

मोतीलालस्य अद्वितीयः पुत्रः जवाहरलालः १८८९ तमे वर्षे नवम्बर् १४ दिनाङ्के जातः। पिता मोतीलालः आदित्तं कार्यं कुर्वन् सायं मित्रैः सह उपविश्य विनोदवार्तालापेन समयं यापयति स्म। तत्समये बालकः जवाहरलालः रहस्यरूपेण ज्येष्ठानां व्यवहारं पश्यन् तम् अवगन्तुं प्रयतते स्म।





एकदा मोतीलालः रक्तवर्णीयं मद्यं पिबन् आसीत्। तत् दृष्ट्वा आश्चर्यचकितः बालकः जवाहरः मातुः समीपं धावन् गत्वा उक्तवान्– "अम्ब! पिता रक्तं पिबति" इति। पुत्रस्य आश्चर्यं मुग्धतां च दृष्ट्वा माता स्वरूपराणी मनसा हसितवती।

प्रायः मोतीलालः सदा उदारतया एव व्यवहरति। किन्तु कोपः आगतः चेत् सः अतीव कठोरः भवति। एकदा बालकः जवाहरः पितुः उत्पीठिकायां स्थितं लेखनीद्वयं दृष्टवान्। पिता सकृत् लेखनीद्वयेन न लिखति इति आलोच्य सः *ततः एकां लेखनीं स्वीकृतवान्। एतत्* ज्ञात्वा क्रुद्धः मोतीलालः पुत्रं वेत्रदण्डेन सम्यक् ताडितवान्।





पित्रा ताडितः अपि जवाहरः पितुः विषये दुरभिप्रायं कमपि न प्राप्तवान्। 'पितुः लेखनी यत् स्वीकृता तत् दोषाय। अतः सः मां ताडितवान्' इति समाधानं प्राप्तवान् सः। जवाहरलालं माता स्वरूपराणी महत्या प्रीत्या अनुरागेण च पश्यति। सा सदा पुत्रं महाभारतस्य रामायणस्य च कथां श्रावयति स्म।

जवाहरलालस्य जन्मदिनं प्रतिवर्षम् अपि सवैभवम् आचर्यते स्म। नूतनानि वस्त्राणि धृतवन्तं तं तुलायाः एकस्मिन् घटे उपवेश्य अन्यस्मिन् घटे गोधूमधान्यं शाकं च स्थापयित्वा तुलाभारं कुर्वन्ति स्म। तथा स्थापितं धान्यं शाकं च निर्धनेभ्यः दीयते स्म। एतत् दृष्ट्वा जवाहरः चिन्तयति स्म यत् एतादृशः जन्मदिनोत्सवः वर्षे एकवारम् एव कुतः आगच्छति इति।





कश्चित् सैनिकः जवाहरस्य मित्रम्। तस्य साहाय्येन एषः अश्वप्रयाणम् अभ्यस्तवान्। कदाचित् एकाकी अश्वारोहणं कृत्वा गच्छन् सः प्रमादवशात् पतितवान्। बालकं विना अश्वः केवलं गृहं प्रत्यागच्छत्।


तस्मिन् समये मोतीलालः मित्रयोः भोजनसत्कारे निमग्नः आसीत्। जवाहरं विनैव प्रत्यागतम् अश्वं दृष्ट्वा सर्वे उद्विग्नाः जाताः। तस्य अन्वेषणार्थम् एकैकः एकैकस्यां दिशि धावितवान्।





अत्रान्तरे जवाहरः सकुशलं गृहं प्रत्यागतवान्। तस्य प्रत्यागमनं दृष्टवतां सर्वेषाम् अपरिमितः सन्तोषः। प्रौढावस्थायां कदाचित् जवाहरः एतं प्रसङ्गं स्मरन् उक्तवान्– "तद्दिने महत् साहसकार्यं कृत्वा प्रत्यागतवन्तम् इव मां सर्वे परमादरेण दृष्टवन्तः" इति।


–(अनुवर्तते)




नेहरूकथा–२


जवहरलालनेहरू यदा दशवर्षीयः आसीत् तदा तदीयौ मातापितरौ नूतनतया निर्मिते 'आनन्दभवन'नामके भवने स्ववसतिं कृतवन्तौ। प्रासादतुल्यं सुविशालं भवनं, परमरमणीयं परिसरं च दृष्ट्वा बालः जवहरः अवर्णनीयम् आनन्दं प्राप्तवान्।

'आत्मना सह क्रीडार्थं भगिनी, भ्राता वा नास्ति' इत्येषा जवहरस्य व्यथा अपि अपगता। तेन भगिनी प्राप्ता आसीत्। वैद्यः जवहरम् एतां वार्तां निवेद्य सविनोदम् उक्तवान्– "भवतः भगिनी जाता अस्ति। सौभाग्यवशात् भागहरः भ्राता तु न" इति। 'एषः वैद्यः मां स्वार्थिनं भावयति खलु?' इति जवहरः नितरां खिन्नः कुपितः च।






मोतीलालः इंग्लेण्ड्देशं गत्वा प्रत्यागतवान्। 'श्रोत्रियेण समुद्रोल्लङ्घनं यत् कृतं तदर्थं प्रायश्चित्तं भवेत्' इति सम्प्रदायपराः उक्तवन्तः। मोतीलालः एतत् सर्वथा निराकृतवान्। अतः तदा एतद्विषये महान् वादविवादः एव प्रवृत्तः। एतेन जवहरः सम्यक् ज्ञातवान् यत् अन्धश्रद्धायाः प्रगतिपरबुद्धेः च कीदृशं घर्षणं प्रचलति इति।



एन्.टि. ब्रूक्स्नामकस्य आंग्लोपाध्यायस्य सकाशे जवहरस्य विद्याभ्यासः आरब्धः। "अलिसेस् अड्वेंचर्स्", "दि जंगल् बुक्", "डान् क्विक्सोट्" इत्यादिभिः आंग्लपुस्तकैः जवहरः नितराम् आकृष्टः अभवत्। तेषाम् अध्ययनतः सः कल्पनासाम्राज्ये विहर्तुं शक्तवान्। तदीया ऊहाशक्तिः एतेन प्रवृद्धा।


आत्मा भौतिकं शरीरं विहाय अदृश्यरूपेण इतस्ततः सञ्चरति इत्येतस्य तत्त्वस्य प्रतिपादकं "दिव्यज्ञानमतम्" अनुसरति स्म ब्रूक्। गुरुमुखात् एतादृशान् बहून् विषयान् तदा तदा शृणोति जवहरः। अतः सः रात्रौ स्वप्ने आत्मानं मेघानां मध्ये सञ्चरन्तं पश्यति स्म।





रशिया-जपानूदेशयोः मध्ये प्रचलतः युद्धस्य वार्ता पत्रिकासु प्रकाश्यते स्म। ताः पठतः जवहरस्य मनसि राष्ट्रियभावनाः उद्गच्छन्ति। प्राचीनकालस्य सैनिकः इव खड्गं गृहीत्वा भारतस्य स्वातन्त्र्यार्थं युद्धं कुर्वतः आत्मनः चित्रं कल्पनालोके सृजन् सन्तोषम् अनुभवति जवहरः।


सप्तदशे वयसि सः मातापितृभ्यां सह इंग्लेण्ड्देशं गतवान्। लण्डनूनगरस्य प्राप्तेः अनन्तरदिने एव ते "डर्बीरिस्" (अश्वक्रीडां) द्रष्टुं गतवन्तः। तद्दिने जवहरः इंग्लेण्ड्वासिनः बहून् भारतीयप्रमुखान् दृष्टवान्।






एतदनन्तरं सः अध्ययनार्थं हारोनगरं गतवान्। तत्र अपरिचितैः सह वासः आसीत् तस्य। आरम्भदिनेषु एकाकिता अनुभूयते स्म तेन। किन्तु अनन्तरकाले सः आत्मानं परिसरानुगुणं परिवर्तयन् क्रीडादिषु अपि आसक्तिं प्रदर्शितवान्।


१९०५तमे वर्षे इंग्लेण्ड्नगरे निर्वाचनं प्रवृत्तम्। निर्वाचनस्य वार्ताः पत्रिकासु प्रकाश्यन्ते स्म। ताः वार्ताः आसक्त्या पठति स्म जवहरः। कदाचित् उपाध्यायः कक्ष्यायां निर्वाचनपरिणामविषये पृष्टवान्। तदा जवहरः एकः एव समीचीनम् उत्तरं दत्तवान्।






स्वदेशे प्रचलत् सङ्घटनाकार्यम् अपि आसक्त्या परिशीलयन् आसीत् जवहरः। तत्समये बङ्गाल-पञ्जाब-महाराष्ट्रादिषु प्रदेशेषु देशभक्ताः आंग्लशासनं विरुध्य युद्धं कुर्वन्तः आसन्। एतादृशं विषयम् अधिकृत्य सम्भाषणं चर्चां वा कर्तुं हारोनगरे कोऽपि न लभ्यते स्म जवहरेण।

कदाचित् शालाया जवहराय बलात् किमपि पुस्तकं दत्तम्। तत्र इटलीदेशीयस्य देशभक्तस्य विप्लवकारिणः गरिबाल्ड्नामकस्य जीवनचरित्रम् आसीत्। तस्य महापुरुषस्य जीवनचरित्रस्य पठनेन जवहरः नितराम् उत्तेजितः जातः। तस्य मनसि इटलीदेशस्य भारतस्य च चरित्रं सदा आवर्तते।





मानसिकतया तीव्रं प्रवर्धमानस्य जवहरस्य कृते अल्पं हारोनगरम् अपर्याप्तं जातम्। 'केम्ब्रिज् गतं चेत् वरं स्यात्' इति पितरं पत्रद्वारा सूचितवान् जवहरः। मोतीलालः एतदर्थम् अनुमतिं दत्तवान्। वर्षद्वयात्मकं हारोनगरवासजीवनं समाप्य जवहरः केम्ब्रिज्नगरं प्रति प्रस्थितवान्।

—(अनुवर्तते)



नेहरूकथा – ३

जवहरलालनेहरू १९०७ तमे वत्सरे उन्नतविद्याभ्यासार्थं हारोतः केम्ब्रिज् गतवान्। तत्र सः विज्ञानम् अभ्यस्यन् अपि चरित्रे राजकीयशास्त्रे अर्थशास्त्रे च आसक्तिं प्रदर्शयन् आसीत्।

भारतदेशतः प्रकाश्यमानाः वृत्तपत्रिकाः सः आसक्त्या पठति। उग्रवादिनः बालगङ्गाधरतिलकमहोदयस्य, अरविन्द-घोषमहोदयस्य च देशीयया आदर्शभावनया सः नितराम् आकृष्टः। तस्य पिता मोतीलालः सौम्यवादिषु नायकेषु अन्यतमः आसीत्।





तेषु दिनेषु केम्ब्रिज्वासिनः भारतीयाः "मज्लीस्" नामिकायाः संस्थायाः आश्रये तदानीन्तनराजकीयपरिस्थितेः विषये चर्चां कुर्वन्ति स्म। जवाहरलालः तादृशीः सभाः गत्वा उपन्यासं शृणोति। किन्तु सङ्कोचवशात् स्वयम् उपन्यासं कर्तुम् उद्युक्तः न भवति।



१९०९ तमे वत्सरे ग्रीष्मकाले जवहरः पित्रा सह ऐरोप्यदेशेषु प्रवासं कृतवान्। सः बर्लिन्नगरे सर्वप्रथमं विमानं दृष्टवान्। तेन विमानेन कौण्ट् जेप्टिलिन् आगतः आसीत्। तं च जर्मनीराजः कैसर् स्वागतीकृतवान्।

१९१० तमे वत्सरे नेहरू केम्ब्रिजविश्वविद्यालयस्य पदवीं प्राप्य विनोदयात्रारूपेण नार्वे गतवान्। तत्समये सः मित्रैः सह स्नानार्थं नदीं गतवान्। हिमसदृशस्य जलस्य स्पर्शनेन तस्य हस्तौ पादौ च काष्ठताम् आप्तवन्तौ। तदीयः सुहृत् वेगेन गच्छतः प्रवाहात् तं रक्षितवान्।





अनन्तरं जवहरः लण्डन्नगरे न्यायशास्त्रम् अधीतवान्। १९१२ तमे वत्सरे न्यायशास्त्रीयां पदवीं सम्पाद्य भारतं प्रत्यागतवान्। 'विवेकी मम पुत्रः न्यायमार्गेण गच्छन् मम योग्यः उत्तराधिकारी भविष्यति' इति तृप्तिं प्राप्तवान् मोतीलाल नेहरू।

स्वदेशं प्रत्यागतः जवहरः राजकीयव्यवहारे आसक्तिं प्रदर्शितवान्। १९१२ तमे वत्सरे बङ्कीपुरप्रदेशे प्रवृत्ते कांग्रेस्महासम्मेलने सः उपस्थितः आसीत्। तस्मिन् सम्मेलने गोपालकृष्ण गोखले तस्मै नितराम् अरोचत।






जवहरलाल् उच्चन्यायालये न्यायवादि-वृत्तिम् आरब्धवान्। किन्तु तस्यां वृत्तौ तस्य विशेषासक्तिः न आसीत्। सः तदा तदा मृगयार्थं गच्छति। किन्तु तत्सन्दर्भे जन्तून् मारयितुं न इच्छति। कदाचित् सः व्रणवशात् अधः पतित्वा तापम् अनुभवन्तं, दैन्येन सर्वत्र दृष्टिं प्रसारयन्तं हरिणशिशुं दृष्टवान्। एतेन तदीयं हृदयं विदीर्णम् इव। ततः सः मृगयासक्तिं परित्यक्तवान्।

१९१६ तमे वत्सरे लखनोकांग्रेस्सम्मेलने सः महात्मगान्धिवर्यम् ऐदम्प्राथम्येन दृष्टवान्। दक्षिणाफ्रिकादेशे भारतीयानां विषये आंग्लेयैः प्रदर्शितं निर्दयव्यवहारं विरुध्य कार्यं कृतवन्तं गान्धिवर्यं दृष्ट्वा जवहरः नितरां सन्तुष्टः, आत्मानं धन्यं भावितवान् चापि।






जवहरलाल् अन्यया अपि व्यक्त्या नितराम् आकृष्टः। सा च अलहाबादनगरे बहूनि भाषणानि कृतवती श्रीमती सरोजिनी नाय्डू। अचिरात् एव कालात् जवहरः दृढदेशभक्तरूपेण प्रवृद्धः।

१९१६ तमे वर्षे वसन्तपञ्चम्यां देहलीनगरे जवहरः कमलां यथाविधि परिणीतवान्। अनन्तरं सः पूर्वजानां जन्मभूमौ काश्मीरे नवोढया पत्न्या सह कानिचन दिनानि यापितवान्।





जवहरलालः बान्धवेन केनचित् सह लढक्प्रदेशं गतवान्। समीपे एव अमरनाथः अस्ति इति श्रुत्वा सः तं द्रष्टुं प्रस्थितवान्। बान्धवेन सह एवं पर्वतमार्गेण गमनसमये अजागरूकतावशात् सः खाते पतितः। समनन्तरम् एव बान्धवेन दृढा रज्जुः अधः प्रेषिता इत्यतः तस्याः आधारेण जवहरः उपरि आगतवान्। सुदैववशात् सः एवम् अपायात् रक्षितः अभवत्। —(अनुवर्तते)




नेहरूकथा – ४


१९१९ तमे वर्षे बह्व्यः अराजकघटनाः प्रवृत्ताः। केनडातः आगतायां 'कामकटुमारू'नामिकायां नौकायां विप्लवकारिणः सन्ति इति सन्देहं प्राप्य आंग्लसर्वकारः तस्याः नौकायाः गमनस्य अवरोधम् अकरोत्। तीरम् आगतायां तस्यां नौकायां स्थितान् प्रयाणिकान् बहुधा अपीडयत् च।

आंग्लाधिकारिणां विरुद्धं कार्यं कुर्वन्ति इति सन्देहस्य ये पात्रं भवन्ति तादृशान् विना विचारणां कारागारवासेन दण्डयितुं यथा शक्येत तथा रौलट्नियमः व्यवहारे आगतः। एतस्य नियमस्य बलात् पत्रिकास्वातन्त्र्यस्य अपहरणम् अपि शक्यम् आसीत्।






एषु एव दिनेषु गान्धीजी अस्वस्थः जातः। गान्धीजी प्रबलं विरोधं प्रकटितवान् चेदपि रौलट्शासनं व्यवहारे आगतम् एव। अतः अखिलभारतस्तरे एतस्य नियमस्य विरुद्धं कार्यं कर्तुम् उद्युक्तः गान्धीजी। एतस्य प्रयत्नस्य नाम 'सत्याग्रहसभा' इति निश्चितम्। 'तस्याः सभायाः सर्वे सदस्याः रौलट्नियमम् उल्लङ्घ्य व्यवहरेयुः' इति निर्णयः स्वीकृतः।



सत्याग्रहसभायां प्रवेशः करणीयः इति निश्चितवान् जवहरः। तथा प्रवेशः कृतः चेत् कारागारवासः निश्चितः। 'मम पुत्रः कारागारे रूक्षायां भूमौ कथं वा शयनं कुर्यात्?' इति आतङ्कः मोतीलालस्य। अतः सः गृहे भूमौ शयनं कुर्वन् तत् कष्टं प्रत्यक्षम् अनुभूतवान्।

पञ्जाबप्रदेशे सैनिकशासनं प्रचलति स्म। तत्समये अमृतसरसमीपस्थे 'जलियन्वाला बाग्' इत्यत्र घोरा घटना प्रवृत्ता। स्वनायकस्य भाषणं श्रोतुम् आगतानां जनानाम् उपरि गोलकास्त्रवर्षणं कर्तुं सैनिकान् आदिष्टवान् अविवेकी आंग्लसेनापतिः जनरल् डैयर्। शतशः स्त्रीपुरुषाः तत्रैव प्राणान् त्यक्तवन्तः। सहस्रशः जनाः तीव्रं व्रणिताः।






'प्रजाः भीतिवशात् विनयेन व्यवहरेयुः' इति डैयर्महोदयस्य आशयः। अतः सः आज्ञापितवान् यत् केषुचित् मार्गेषु सम्मुखम् आगतः आंग्लाधिकारी सर्पणपूर्वकम् अग्रे गत्वा नमस्करणीयः इति। 'विद्यार्थिभिः प्रतिदिनं १०-१५ मैल् सञ्चारं कृत्वा घोरे आतपे घण्टां यावत् स्थातव्यम्' इति तस्य अन्या आज्ञा!

सैनिकशासनस्य अपगमानन्तरं चत्वारः कांग्रेस्नायकाः पञ्जाबप्रदेशे परिवर्तनम् आनेतुम् उद्युक्ताः जाताः। पण्डितः मदनमोहनमालवीयः स्वामी श्रद्धानन्दः च पुनरावासव्यवस्थार्थं प्रयत्नम् आरब्धवन्तौ। बहून् सेनासदस्यान् तौ मेलितवन्तौ चापि।






'जलियन्वाला बाग्' घटनायाः वास्तविकं स्वरूपं निर्णेतुं कांग्रेस् एकां समितिम् अमृतसरं प्रति अप्रेषयत्। तस्याः समित्याः नेतारौ मोतीलाल् नेहरू, देशबन्धुः चित्तरञ्जनदासः च। चित्तरञ्जनदासस्य साहाय्यार्थं जवहरलालः नियोजितः अभवत्। डैयर्वर्येण कृतं दारुणं मारणहोमं श्रुत्वा जवहरः सर्वथा दिग्भ्रान्तः।


उद्दिष्टस्य कार्यस्य समाप्तेः अनन्तरं जवहरलालः रात्रिसमये धूमशकटेन देहलीं प्रति प्रस्थितवान्। रिक्तायां शयनिकायां सः सुप्तवान् चापि। किन्तु प्रातःकालाभ्यन्तरे स च परिसरः सैनिकैः व्याप्तः आसीत्। तेषां सैनिकानां मध्ये उपविश्य जनरल् डैयर् आत्मना कृतं दारुणं कृत्यं निर्लज्जं साभिमानं च वर्णयन् आसीत्।






१९१९ तमे वर्षे अमृतसरनगरे कांग्रेसमहासभा प्रवृत्ता। तस्याः सभायाः अध्यक्षः आसीत् मोतीलाल नेहरू। एतस्याम् एव सभायां भारतराष्ट्रिय-कांग्रेस्संस्थायाः नूतनशकस्य नेतृरूपेण गान्धीजी अभिज्ञातः।

लोकमान्यतिलकः १९२० तमे वर्षे अगस्ट्मासे प्रथमे दिनाङ्के मुम्बईनगरे कालवशः जातः। १९०६ तमे वर्षे तिलकः सूरतनगरे प्रवृत्तायां कांग्रेस्सभायां सम्पूर्णस्वराज्यं प्रतिपादितवान् आसीत्। १९१० तमे वर्षे अरविन्दघोष् राजकीयव्यवहारात् निवृत्तः जातः आसीत्। तिलकस्य मरणस्य अनन्तरं गान्धीजी कांग्रेस्नायकपदम् अलङ्कर्तुं सन्नाहं कुर्वन् आसीत्।





तिलकस्य मरणवार्तां श्रुत्वा तद्दिने एव गान्धीजी जवहरलालः च मुम्बईनगरम् आगतवन्तौ। तत्र सुमहत्यां सभायां तौ भागम् ऊढवन्तौ। तस्याः सभायाः विषये जवहरः एवम् उक्तवान् आसीत्— "प्रीतिपात्रस्य नायकस्य विषये गौरवं प्रदर्शयितुं दशलक्षजनैः युक्तं मुम्बईनगरम् एव उपस्थितम् आसीत् इव" इति।


—(अनुवर्तते)



नेहरूकथा – ५

१९२० तमे वत्सरे जवहरस्य मातुः पत्न्याः च आरोग्यं विषमतां गतम्। सः मात्रा पत्न्या च सह मुस्सूरु गतवान्। यस्मिन् वसतिगृहे तेन स्थितं तत्र केचन अपघनज्जनाः अपि आसन्। अपघनज्जनाः आंग्लविरोधिनः। अतः 'अपघनज्जनैः सह वार्तालापं न करिष्यामि' इति वचनं ददातु इति जवहरम् उक्तवान् कश्चन आंग्लेयः न्यायाधिकारी।

अपघनज्जनैः सह वार्तालापस्य आवश्यकता काऽपि न आसीत् जवहरस्य। तथापि सः तथा वचनदानं सर्वथा निराकृतवान्। एतस्य परिणामतः 'डेहराडूनगरं परित्यज्य गन्तव्यं भवता' इति आज्ञा प्राप्ता तेन। जवहरः पत्नीं मातरं च तत्रैव परित्यज्य अलहाबादनगरं गतवान्। तत्र सः कदाचित् कृषिकाणां शोभायात्रां दृष्टवान्।





प्रतापगढमण्डलस्य ग्रामवासिनः जनाः स्वकष्टपरम्परां नागरिकान् निवेदयितुं तत्र आगताः आसन्। ते जवहरं दृष्ट्वा साग्रहं प्रार्थितवन्तः यत् भवता अस्मत्प्रदेशम् आगत्य ग्रामीणानां कष्टपरम्परा स्वयं द्रष्टव्या इति।

जवहरलालः ऐदम्प्राथम्येन ग्रामेषु सञ्चरन् ग्रामीणजनानां जीवनस्य विविधानि मुखानि, तेषां समस्याः, ग्रामेषु प्रचलन्तं दुराचारं च प्रत्यक्षं दृष्टवान्। कृषिकाः परिश्रमेण कार्यं कुर्वन्ति स्म। तस्य दुरुपयोगं स्वीकुर्वन्ति स्म धनिकाः।






१९२१ तमे वर्षे जनवरीमासे केचन कृषिकनायकाः कारागारे स्थापिताः। तेषां विमोचनं सम्पादयितुं सहस्रशः कृषिकाः उद्युक्ताः जाताः। तेषां दर्शनार्थं प्रस्थितवान् जवहरः। मध्येमार्गं सेतुसमीपे आरक्षकाः जवहरस्य गमनं बलात् निरुद्धवन्तः।

यदि जवहरस्य गमनं अनुमतं भवेत् तर्हि सः सौहार्दयुतेन वार्तालापेन कृषिकाणां कोपोपशमनम् अकरिष्यत्। किन्तु अविवेकेन व्यवहरन्तः आरक्षकाः तं निरुद्धवन्तः इत्यतः कृषिकाः क्रुद्धाः। महान् कोलाहलः आरब्धः। कोलाहलशमनार्थम् आरक्षकाः गोलकास्त्रप्रयोगं कृतवन्तः। एतेन बहवः मृताः।



आवेशेन वशीकृताः कृषिकाः कस्यचित् धनिकस्य गृहं लुण्ठितवन्तः। तस्य धनिकस्य शत्रवः केचन 'गान्धीजिना एवं कर्तुं सूचितम् अस्ति' इति वदन्तः तान् कृषिकान् प्रेरितवन्तः आसन्। निष्कपटाः कृषिकाः तेषु वचनेषु विश्वस्य 'गान्धीमहात्मा जयतात्' इति वदन्तः धनिकगृहं लुण्ठितवन्तः आसन्।





एषा वार्ता जवहरेण श्रुता। स तु नितरां खिन्नः, कुपितः च। एतादृशयः घटनाः कांग्रेस् संस्थायाः नाम मलिनीकुर्वन्ति इति आलोच्य सः ग्रामं गतवान्। सभाम् आयोजितवान् च। तस्य भाषणं श्रोतुं सहस्रशः ग्रामीणाः उपस्थिताः आसन्।

कृषिकैः यत् कृतं तत् निन्दायोग्यम् अपमानकरं च इति सः उद्घोषितवान्। 'ये धनिकस्य गृहं लुण्ठितवन्तः ते मया द्रष्टव्याः। अतः ते प्रामाणिकबुद्धया हस्तम् उन्नयेयुः' इति आदिष्टवान् सः। तदा आरक्षकाः उपस्थिताः सन्ति इति एतम् अंशम् अपि उपेक्ष्य चतुर्विंशतिः कृषिकाः हस्तम् उन्नीतवनतः।






एतां घटनां व्याजीकृत्य आरक्षकाः तत्र उपस्थितान्, तेषां बन्धुमित्राणि च कारागारे स्थापितवन्तः। एवं सहस्राधिकाः जनाः कारागारे स्थापिताः। एकं वर्षं यावत् न्यायालये विचारणा प्रवृत्ता। बहवः सुदीर्घकारागारवासेन दण्डिताः अभवन्।

'मम कारणतः बहवः निरपराधिनः ग्रामवासिनः कारागारवासेन दण्डिताः अभवन् खलु?' इति खेदम् अनुभवति जवहरः। एतया घटनया ग्रामीणानां प्रामाणिकता, धैर्यं, निष्कल्मषं प्रेम च जवहरेण सम्यक् ज्ञातम्।





इतः पूर्वं कृषिकाणाम् एतादृशी सभा जवहरेण न दृष्टा आसीत्। न श्रुता आसीत् अपि। एतस्याः घटनायाः अनन्तरं कृषिकाणां साहाय्यार्थं सर्वकारेण नूतनाः नियमाः कृताः। एतदनन्तरं धनिकाः पूर्ववत् सुलभतया कृषिकान् पीडयितुं न शक्नुवन्ति स्म।

—(अनुवर्तते)



नेहरूकथा – ६


१९२० तमे वत्सरे कलकत्तानगरे कांग्रेस्महाधिवेशनं प्रवृत्तम्। अमेरिकादेशे बहूनि वर्षाणि स्थितः, तेषु एव दिनेषु मातृभूमिं प्रत्यागतः लालालजपतरायः तस्य अधिवेशनस्य आध्यक्षं निरूढवान्।

आंग्लसर्वकारस्य साहाय्यकरणं सर्वथा निराकरणीयम् इति कांग्रेस्संस्थया प्रकटनं दातव्यम् इति गान्धीमहोदयस्य आशयः। किन्तु बहवो नायकाः एतस्मिन् विषये सहमतिं न प्रदर्शितवन्तः। मोतीलालनेहरू तु गान्धीजी-अभिप्रायं सहर्षम् अङ्गीकृतवान्।






कांग्रेस्संस्थायाः स्वरूपं दिने दिने परिवर्तमानम् आसीत्। इदानीं सा केवलम् उच्चस्तरीयाणां संस्था न। मध्यमस्तरीयाः निम्नस्तरीयाः चापि खादीवस्त्रं धरन्तः कांग्रेस्संस्थायाः सदस्याः भवन्ति स्म। तादृशाः सर्वे असहकारप्रकटने सहमतिं प्रदर्शितवन्तः।



कांग्रेसुसंस्थायां यत् परिवर्तनं दृश्यते तत् न शुभसूचकम् इति भावयत्सु महम्मदाली जिन्ना अपि अन्यतमः। कांग्रेसुसंस्थायां एतदृशं महत् परिवर्तनं सः सर्वथा न इच्छति।

कांग्रेसुमहाधिवेशनस्य अनन्तरं जवहरलाल् गान्धीजीमहोदयं शान्तिनिकेतनं नीतवान्। तत्र गान्धीजी-रवीन्द्रनाथठाकूरयोः चिरस्मरणीयः समावेशः प्रवृत्तः। गान्धीजी रवीन्द्रनाथवर्यं 'बोरोदादा' (अग्रज!) इति सम्बोधितवान्।





असहकारान्दोलनं देशे सर्वत्र प्रसृतम्। मासद्वयाभ्यन्तरे – तन्नाम १९२१ तमवर्षस्य डिसेम्बरमासे, १९२२ तमवर्षस्य जनवरीमासे च – ३०,००० जनाः प्रायः कारागारं प्रवेशिताः। जवहरलाल् अपि कारागारे स्थापितः। कारागारवासस्य प्रथमः अनुभवः अयं तस्य।

आंग्लसाम्राज्यस्य भावी चक्रवर्ती युवराजः वेल्स् तत्समये पर्यटनार्थं भारतम् आगतवान्। 'तस्य सर्वे कार्यक्रमाः बहिष्करणीयाः' इति उद्घोषितं कांग्रेस्संस्थया। मुम्बई-कलकत्ताप्रभृतिषु महानगरेषु युवराजसम्बन्धिनी शोभायात्रा यदा गता तदा राजमार्गाः निर्मानुषाः दृश्यन्ते स्म।





तत्समये एव आरक्षकाणां पीडया क्रुद्धाः चौरीचौराग्रामीणाः केचन आरक्षकालयं अग्निसात्कृतवन्तः। एतस्मिन् सन्दर्भे भवनस्थाः केचन आरक्षकाः सजीवं दग्धाः अभवन्। हिंसाकृत्यं सर्वथा असहमानः गान्धी राष्ट्रव्यापि आन्दोलनं हठात् स्थगनीयम् इति आदिष्टवान्।

कुत्रापि प्रवृत्तस्य हिंसाकृत्यस्य निमित्तं राष्ट्रव्यापिनः आन्दोलनस्य स्थगनं जवहराय सर्वथा न अरोचत। अन्ये केचन प्रमुखाः अपि गान्धीजिविचारे असम्मतिं प्रदर्शितवन्तः। तथापि गान्धीजी विचारे परिवर्तनं न आनीतवान्। ततः अल्पे एव काले गान्धीजी कारागारे स्थापितः।





जवहरलालु द्विवारं कारागारं प्रवेशितः अभवत्। भारते शासननियमानां कार्यान्वयनं यत् प्रवर्तते तत्र १९२३ तमे वर्षे जवाहरस्य दृष्टिः पतिता। पञ्जाबप्रदेशे महाराजः नाभा आंग्लैः सिंहासनच्युतः कृतः। कश्चन ऐ.ए.एस्. अधिकारी शासनसूत्राणि गृहीतवान्। जैटोप्रदेशे सिक्खमतानुगुणं प्रचलतः पारम्परिकोत्सवस्य सञ्चालनं तेन निषिद्धम्।


एताम् आज्ञां बहवः प्रतिभटितवन्तः। केचन तु उत्सवः कथञ्चित् निर्वर्तनीयः एव इति उद्देशेन जैटो गतवन्तः। मध्येमार्गं तान् अवरुध्य ताडितवन्तः आरक्षकाः। जवहरलालमहोदयः के. सन्तानं, किद्वानी इत्येताभ्यां मित्राभ्यां सह तत्रत्यां परिस्थितिं परिशीलयितुं गतवान्।





तत्र आरक्षकाः जवहरलालं के. सन्तानंवर्यं च निगडेन बद्धवा नगरस्य मार्गेषु शोभायात्रया नीतवन्तः। अन्धकारमये कारागारे ताभ्यां रात्रिः महता कष्टेन यापिता। अन्धकारे कश्चन मूषकः आगत्य जवहरस्य मुखं व्रणितम् अकरोत्।

—(अनुवर्तते)



नेहरूकथा – ७

जवहरलालः कारागारतः विमोचनं प्राप्तवान्। तत्समये सः सन्निपातज्वरेण पीडितः अभवत्। एतत्कारणतः सः शय्याम् आश्रितवान्। कानिचन दिनानि सः सर्वकार्यक्रमान् अपि परित्यज्य शान्ततया समयं यापितवान्।

१९२३ तमे वर्षे काकिनाडनगरे प्रवृत्तायां कांग्रेसुमहासभायां मुस्लिं राष्ट्रियनायकः एं. मोहम्मद् अली अध्यक्षपदम् अलङ्कृतवान्। तस्य अनुरोधकारणतः जवहरलालः कांग्रेसुसंस्थायाः कार्यदर्शी अभवत्।





एतदनन्तरं तेन अन्योऽपि नूतनः अनुभवः प्राप्तः। अलहाबादसमीपे गङ्गा-यमुना-सरस्वतीनद्यः परस्परं मिलन्ति। अस्मिन् त्रिवेणीसङ्गमे तदा तदा कुम्भमेलोत्सवः प्रचलति। एषः उत्सवः महता वैभवेन परम्परया प्रचलति।



'अस्मिन् त्रिवेणीसङ्गमे स्नानं क्षेमकरं न' इति आलोच्य तत्कानीलसर्वकारः त्रिवेणीसङ्गमे स्नानस्य निषेधम् अकरोत्। आरक्षकाः बलवतीं रक्षणव्यवस्थां कृतवन्तः। कोऽपि जले अवतरणं यथा न कुर्यात् तथा उन्नता वृतिः तैः निर्मिता।

सुप्रसिद्धः नायकः पण्डितः मदनमोहनमालवीयः शासनव्यवहारस्य विरोधं कृतवान्। वृतेः पार्श्वे सिकतानाम् उपरि स्वानुयायिभिः सह शान्तरीत्या सत्याग्रहम् आरब्धवान्। कुम्भमेलं द्रष्टुं गतः जवहरः तस्मिन् सत्याग्रहे भागं गृहीतवान्।





काश्चन घण्टाः अतीताः। सूर्यः मध्याकाशम् आगतवान्। तप्ताः सिकताः तीव्रं तापं जनयन्ति स्म। मध्याह्नानन्तरं जवहरः असहनया उत्थाय वृतेः उपरि उपविश्य कांग्रेसध्वजं गृहीतवान्।


एतत् दृश्यं दृष्ट्वा शतशः जनाः उत्साहं प्राप्य वृतेः उपरि उपविष्टवन्तः। एतेन वृतिः भग्ना। जनाः नदीं प्रविष्टवन्तः। नेहरू अपि जलम् अवतीर्णः। अन्ते मालवीयः अपि जलम् अवतीर्णः।





अहमदाबादनगरे प्रवृत्तायां कांग्रेस्सभायां गान्धीजी प्रतिपादितवान् यत् ये तन्तुनिर्माणं कर्तुं शक्नुवन्ति ते केवलं कांग्रेस्सदस्याः भवितुम् अर्हन्ति इति। मोतीलाल् नेहरू, देशबन्धुः चित्तरञ्जनदास् च एतं विचारं विरुध्य सभात्यागं कृतवन्तः। एतेन गान्धीजिना स्वप्रतिपादनम् उपसंहरणीयम् आपतितम्।

१९२४ तमे वत्सरे प्रवृत्तायाः कांग्रेस् महासभायाः अध्यक्षः आसीत् गान्धीजी। तस्य अपेक्षानुगुणं जवहरलालः पुनः अपि कार्यदर्शी अभवत्। जवहरलाले सर्वे कांग्रेस्सदस्याः विशेषविश्वासं प्रकटयन्ति इति ज्ञातवान् गान्धीजी।





१९२५ तमे वत्सरे मोतीलालस्य आरोग्यं विषमतां गतम्। सः सकुटुम्बं हिमालयप्रदेशं गतवान्। जवहरलाल् अपि तैः सह गतः। यदा सः चाम्बाप्रदेशे आसीत् तदा चित्तरञ्जनदासः कीर्तिशेषः जातः इति वार्ता प्राप्ता। पिता पुत्रः च कलकत्तानगरं प्रति प्रस्थितवन्तौ।

१९२४ तमे वत्सरे अलहाबादनगरे मतीयकलहाः प्रवृद्धाः। एतत् दृष्ट्वा जवहरलालः चिन्ताक्रान्तः अभवत्। स्वस्य प्रार्थनास्थलस्य समीपे हिन्दवः शोभायात्रया यत् गच्छन्ति तेन महम्मदीयाः कुपिताः। हिन्दुधर्मे तु शोभायात्रायाः महत्त्वपूर्णं स्थानम् आसीत्।





मोहम्मदीयानां व्यवहारस्य विरोधं प्रकटयन्तः हिन्दवः अतिप्राचीनकालात् प्रवर्तमानां रामलीलाशोभायात्रां स्थगितवन्तः। तादृश्यां शोभायात्रायां बाल्ये भागं गृहीतवान् आसीत् जवहरः। तं सन्दर्भम् इदानीं स्मरति सः। परस्परावगतेः अभावात् एवं प्रवर्तते इति जानन् जवहरः एतस्य परिहारोपायं सगम्भीरं चिन्तयति।

—(अनुवर्तते)



नेहरूकथा – ८


१९२६ तमे वर्षे मार्चमासे जवहरलालः अस्वस्थां पत्नीं कमलां स्विसर्ल्याण्ड् नीतवान्। ताभ्यां सह पुत्री बालिका इन्दिरा अपि गतवती। एवं परिसरपरिवर्तनकारणतः कमलायाः आरोग्ये दिने दिने प्रगतिः दृष्टा।

यदा जवहरलाल् युरोपदेशे आसीत् तदा प्रवासं कुर्वतां, श्यां जी कृष्णवीर्, राजा महेन्द्रप्रताप्, मेडम् कामा इत्यादीनां बहूनां स्वातन्त्र्यप्रतिपादकानां भारतीयानां परिचयं प्राप्य तैः सह समालोचनम् अपि कृतवान्।





१९२७ तमे वर्षे मोतीलाल नेहरू युरोप् गत्वा जवहरलालं दृष्टवान्। ते सर्वे मिलित्वा मास्को गतवन्तः। जार्वर्यस्य अधिकारस्य समाप्तेः अनन्तरं सोवियत् यूनियन् यत् स्थापितम् अभवत् तस्य दशमे वार्षिकोत्सवे ते भागं गृहीतवन्तः। एवम् अयं प्रवासः अतीव लाभकारकः सम्पन्नः।



१९२७ तमे वर्षे मदरास्नगरे कांग्रेस्सम्मेलनं यत् प्रवृत्तं ततः पूर्वं जवहरलाल् स्वदेशम् आगतवान्। कार्यदर्शी सः 'भारतं स्वतन्त्रं भवेत् एव' इति प्रबलतया प्रतिपादितवान्।

तस्मिन् एव वर्षे भारतस्य राज्याङ्गस्य कार्यस्य परिशीलनार्थम् आंग्लशासनेन सर् जान् सैमन्वर्यस्य अध्यक्षतायां एका समितिः प्रेषिता। तस्यां समित्यां भारतीयानाम् अपि सदस्यत्वं स्यात् इति कांग्रेस्संस्था असूचयत्। तथापि तस्यां समित्यां केवलम् आंग्लेयाः सदस्याः अभवन्।





अतः सैमन् समितिः तिरस्करणीया इति कांग्रेस्संस्थया निर्णीतम्। यत्र यत्र सा समितिः गता तत्र सर्वत्र भारतीयैः कृष्णपताका प्रदर्शिता। 'सैमन्! प्रतिगच्छतु" इति सर्वत्र निनादः उत्पन्नः।

लाहोरनगरे सैमन्समितेः विरुद्धं यत् प्रदर्शनं प्रवृत्तं तस्य अध्यक्षः आसीत् लाला लजपतरायः। युवकः कश्चन आंग्लाधिकारी दण्डेन लजपतरायस्य उरसि ताडितवान्। लजपतरायः अधः अपतत्।






लजपतरायस्य विषये भारतीयानां विशेषादरः आसीत्। तस्य विषये शासनेन यत् दौर्जन्यं प्रदर्शितं तेन प्रजाः क्रुद्धाः। अल्पे एव काले लजपतरायः दिवङ्गतः अभवत्। दण्डप्रहारकारणतः एव तस्य मरणं जातम् इति बहवः विश्वसितवन्तः। जवहरलाल् अपि तथैव विश्वसिति।


शासनेन शोभायात्रायाः निषेधः कृतः। एताम् आज्ञां धिक्कृत्य जवहरः लक्नोनगरे शोभायात्रायाः व्यवस्थां कृतवान्। तत्समये आरक्षकाः दण्डेन जवहरं पृष्ठे द्विवारं ताडितवन्तः।





अनन्तरदिने एव सैमन्सभितिः लक्नोनगरम् आगता। एतद्विरुद्धं जवहरः जनान् सम्मेलितवान्। जनाः शान्तया रीत्या गच्छन्तः आसन्। तत्समये अश्वान् आरुह्य तत्र आगताः आरक्षकाः जनान् अविवेकेन निर्दयं ताडितवन्तः।

एतत्सन्दर्भे जवहरः पुनरपि आरक्षकैः ताडितः अभवत्। तदा जवहरस्य असम्मतिम् अपि अविगणय्य तदीयाः सुहृदः तं ततः दूरं नीतवन्तः। आरक्षकाणां दुर्व्यवहारः निर्बाधं प्रवृत्तः।





पञ्जाबनायकस्य लालालजपतरायस्य मरणं यत् प्रवृत्तम्, आरक्षकाणां स्वेच्छावृत्तिः प्रवृद्धा यत्, तदुभयेन प्रेरितः भगत्सिंहः आंग्लेयानां विरोधितया उग्रं कार्यम् आरब्धवान्। अस्मिन् प्रयत्ने तेन प्राणाः अर्पिताः च।

—(अनुवर्तते)